दिनाङ्क :-27.02.2026

प्रात: - 06:55

पीएम-वेबिनारः

प्रधानमन्त्री नरेन्द्रमोदी अद्य प्रातः वीडियो कान्फ्रेन्सिङ्ग इति माध्यमेन "विकसित भारताय प्रौद्योगिकी, परिष्काराः वित्तञ्च" इति विषये वेबिनार्-मध्ये "आयव्ययसंकल्पसत्रोत्तर" सम्मेलनं सम्बोधयिष्यति। सत्रावधौ सार्वजनिन-सम्पत्ति-व्ययः, अवसंरचना, वित्तकोषीय-क्षेत्रेषु परिष्काराः, वित्तीयक्षेत्रस्य संरचना, वित्त-विपणिनां गहनता, कर-परिष्कारेण जीवनस्य सुगमता इत्यादिषु विषयेषु चर्चा भविष्यति। अस्मात् साम्प्रतिकात्-आयव्ययसंकल्पसत्रात् उद्भूतानां प्रमुखविषयबिन्दूनामुपरि चर्चायै आयोजितासु पोस्ट्-बजट् वेबिनार इति शृङ्खलासु एतत् प्रथमम् आयोजनम् अस्ति। एतेषां वेबिनार इत्येतेषां उद्देश्यं भूतकालस्य अनुभवेभ्यः शिक्षां संगृह्य सहभागिभ्यः संरचितं प्रतिपुष्टिम् अन्विष्य च वित्तवर्षस्यास्य आयव्ययिक-घोषणानां परिणामान् अभिमुखीकृत्य विविध-हितधारकाणां व्यावहारिक-अनुभवस्य अन्तर्दृष्टेः च आधारेण उद्योगक्षेत्रस्य, वित्तीयसंस्थानां, विपण्य-सहभागिनां, सर्वकारस्य, उद्योगनियामकानां, शैक्षणिकक्षेत्रस्य च हितधारकाणाञ्च प्रमुख-आयव्ययिक-घोषणानां प्रभावी-कार्यान्वयन-मार्गाणां विषये चर्चा करणमस्ति।

भारत-इस्रायल एम् ओ यूः

भारत-इस्रायलल-देशौ सांस्कृतिक-आदान-प्रदानम्, भू-भौतिक-अन्वेषणम्, मत्स्यपालन-जल-कृषिः, यू. पी. आई. इत्यादिषु क्षेत्रेषु कृत्रिम-बुद्धिचातुर्यस्य उपयोगेन शिक्षायाः प्रगतिविषये अनेकेषु सहमति-पत्रेषु हस्ताक्षरण-पूर्वकं एम्. ओ. यू. इत्येतानां च आदानप्रदानम् अकुरुताम्। अद्य प्रधानमन्त्रिणा नरेन्द्रमोदिना तस्य इस्रायल-देशस्य समकक्षियेण बेञ्जामिन् नेतन्याहु-वर्येण सह प्रतिनिधिस्तरीय-वार्तायाः अनन्तरं एम्. ओ. यू. इत्येतेषां आदानप्रदानम् कृतम्। स्वकीये

सांवादिके-वक्तव्येश्रीमोदी अवदत् यत्, भारत-इस्रायल-सम्बन्धः गाढविश्वासस्य, सहभागित्व-लोकतान्त्रिक-मूल्यानाम्, गहन-मानवीय-संवेदनशीलतायाः च दृढ-आधारोपरि स्थापितः अस्तीति। सः अवदत् यत्, समयस्य प्रत्येकपरीक्षायाम् एतत् बन्धनं स्थितम् अस्ति। प्रधानमन्त्री अवदत् यत् उभौ देशौ परिस्थितिविशेषे सम्बन्धस्थापयितुं निर्णयम् अकुरुतामिति।

द्विदिवसीयायाः इस्रायल-देशस्य ऐतिहासिकयात्रायाः समापनानन्तरं प्रधानमन्त्री नवदेहलीं सम्प्राप्तः।

राष्ट्रपतिः-जैसलमेर भ्रमणम्

राष्ट्रपतिः द्रौपदी मुर्मू इत्येषा राजस्थानस्य द्विदिवसीय-यात्रायै जर्सल्मेरं प्रति गतवती। राष्ट्रपतिः मुर्मु अद्य जैसल्मेर्-नगरे भारतीय-वायुसेनायाः वायुशक्ति-अभ्यासं द्रष्टुं शक्नोति। रक्षामन्त्रालयेन सूचितं यत् अभ्यासात् पूर्वं राष्ट्रपतिः स्वदेशीय-लघु-युद्ध-हेलिकाप्टराख्ये उदग्रयाने -'प्रचण्ड' इत्यस्मिन् उड्डयनं करिष्यति।

भारत-केन्या JDCC

भारत-केन्या-देशयोः संयुक्तरक्षा-सहकारसमित्याः चतुर्थं सम्मेलनम् ह्यः सम्पन्नम्, यत्र रक्षा-अनुसंधाने, विकासे, उत्पादने च सहयोगं प्रवर्धयितुं चर्चा चर्चिता। सेवा-सहभागितायाः विस्तारः, प्रशिक्षण-अवसराणां वर्धनम्, समुद्रीय-सुरक्षा-सहकारस्य अन्वेषणमित्यादीनां विषये अपि चर्चा केन्द्रिता आसीत्। सभायां उभयपक्षौ स्वकीयानां नौसेनानां मध्ये संरचित-संवादस्य आरम्भेन सह सेवा-प्रति-सेवा-सम्बन्धस्य व्याप्तिम् विस्तारयितुं सहमतौ अभवताम्।

## केनडादेशस्य प्रधानमन्त्रिणः भ्रमणम्

केनडादेशस्य प्रधानमन्त्री मार्क् कार्नी अद्य चतुर्दिवसीयायै आधिकारिकयात्रायै भारतं आगच्छति। विदेशमन्त्रालयः अवदत् यत् सः प्राथम्येन मुम्बै-नगरं आगमिष्यति, अग्रिमे दिने पृथक् पृथक् व्यापारोपवेशनेषु भागं संगृह्य भारतीय-कनाडादेशयोः मुख्यकार्यकारी-अधिकारिभिः, उद्योग-वित्तीय-विशेषज्ञैः च सह संवादं करिष्यति इति। मार्च्-मासस्य प्रथमे दिनाङ्के प्रधानमन्त्री कार्नी नवदेहली-नगरं प्राप्स्यति, तदनन्तरं दिने सः प्रधानमन्त्रिणा नरेन्द्रमोदिना सह प्रतिनिधि-स्तरस्य वार्तालापं करिष्यति। उभौ नेतारौ भारत-केनडा-सामरिकसहभागित्वस्य विविधक्षेत्रेषु अद्यपर्यन्तं प्राप्तायाः प्रगत्याः समीक्षां करिष्यतः।

## ICC T20 विश्व कपः

आई. सी. सी. पुरुषाणां टी-20 विश्वकप्-क्रीडायां गतरात्रौ चेन्नै-नगरस्य एम्. ए. चिदम्बरम्-क्रीडाङ्गणे महत्त्वपूर्णायां सूपर्-एइट्-क्रीडायां भारतं जिम्बाब्वे-देशम् द्विसप्ततिः धावनांकैः पराजयत। भारतेन निर्धारितस्य 257 धावनांकानां विशालस्य लक्ष्यस्य अनुसरणं कुर्वन्, सिकन्दर् रज़ा इत्यस्य नेतृत्वे जिम्बाब्वे-देशः 20 ओवर्-मध्ये 6 विकेट्-हानिं प्राप्य 184 रन्स् प्राप्तुं समर्थः अभवत्।